## वेश्च स्वनो भोजने। (६९/२२७४)

वेः उपसर्गात् अवात् चोत्तरस्य भोजनार्थे स्वनतेः सकास्य मूर्धन्यादेशो भवति। विष्वणति। व्यष्वणत्। विषष्वाण। अवष्वणति। [1]अवाष्वणत्। अवषष्वाण। [2]अभ्यवहारक्रियाविशेषो[3]ऽभिधीयते, यत्र स्वननमस्ति[4]। भोजने इति किम्। विस्वनति मृदङ्गः। अवस्वनति मृदङ्गः[5] ॥

## परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्। (७०/२२७५)

परि नि वि इत्येतेभ्यः उपसर्गेभ्यः उत्तरेषां सेव सित सय सिवु सह सुट् स्तु स्वञ्ज इत्येतेषां[6] सकारस्य मूर्धन्य आदेशः भवति। परिषेवते। निषेवते। विषेवते। पर्यषेवत। न्यषेवत। व्यषेवत। परिषिषेविषते। निषिषेविषते। विषिषेविषते। [7]सित – परिषितः। निषितः। विषितः। सय – परिषयः। निषयः। विषयः। [8]सिव् – परिषीव्यति। निषीव्यति। विषीव्यति। [9]पर्यषीव्यत्। न्यषीव्यत्। व्यषीव्यत्। पर्यसीव्यत्। न्यसीव्यत्। व्यसीव्यत्। सह – परिषहते। निषहते। विषहते। [10]पर्यषहत। न्यषहत। व्यषहत। [11]पर्यसहत। न्यसहत। व्यसहत। सुट् – परिष्करोति। [12]पर्यष्करोत्। पर्यस्करोत्। स्तु – परिष्टौति। निष्टौति। विष्टौति। पर्यष्टौत्। न्यष्टौत्। व्यष्टौत्। पर्यस्तौत्। न्यस्तौत्। व्यस्तौत्। स्वञ्ज – दंशसञ्जस्वञ्जाम् (६.४.२५/२३१६) इति नलोपः। परिष्वजते। निष्वजते। विष्वजते। पर्यष्वजत, पर्यस्वजत। पूर्वेणैव सिद्धे स्तुस्वञ्जिग्रहणमुत्तरार्थम्, अड्व्यवाये विभाषा यथा स्यात् ॥

## सिवादीनां वाड्व्यवायेऽपि। (७१/२३८९)

[13]अनन्तरसूत्रे सिवुसहसुट्स्तुस्वञ्जाम् (८.३.७०/२२७५) इति सिवादयः। सिवादीनाम् अड्व्यवायेऽपि परिनिविभ्यः उत्तरस्य सकारस्य वा मूर्धन्यो भवति। [14]तथा चैवोदाहृतम् ॥

## अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु। (७२/२३४९)

अनु वि परि अभि नि इत्येतेभ्यः उत्तरस्य स्यन्दतेः [15]अप्राणिषु सकारस्य वा मूर्धन्यादेशो भवति। अनुष्यन्दते। विष्यन्दते। परिष्यन्दते। अभिष्यन्दते [16]तैलम्। निष्यन्दते। अनुस्यन्दते। विस्यन्दते। परिस्यन्दते। अभिस्यन्दते। निस्यन्दते। अप्राणिषु इति किम्? [17]अनुस्यन्दते मत्स्य उदके। प्राण्यप्राणिविषयस्यापि स्यन्दतेः अयं विकल्पो भवति, अनुष्यन्देते मत्स्योदके, अनुस्यन्देते। अप्राणिषु इति पर्युदासोऽयम्, न [18]प्रसज्यप्रतिषेधः[19] ॥

---

1. अवाष्वणत् नास्ति इ. 2. अभ्यवहारविशेषो क. 3. उच्यते इ. ह, विधीयते क. 4. सशब्दं भुङ्क्ते इत्यर्थः इत्यधिकम् इ.ह. 5. व्यवाभ्याम् किम्? निस्वनति इत्यधिकम् ड. 6. सम्बन्धिनः इत्यधिकम् क. 7. प्राक् सितादित्यस्य पूर्णोऽवधिः इ.ड.ह. 8. सिवु क.इ.ड. 9. पर्यषीव्यत् नास्ति ब.क.ड.इ. 10. पर्यषहत नास्ति ब.ड. 11. पर्यसहत नास्ति इ. 12. पर्यष्करोत् नास्ति इ. 13. अनन्तरसूत्रे नास्ति ह. 14. तथा नास्ति ब, पर्यषीव्यत्, पर्यसीव्यत्। न्यषीव्यत्, व्यषीव्यत्। पर्यषहत, पर्यसहत। न्यषहत, न्यसहत। व्यषहत, व्यसहत। पर्यष्करोत्, पर्यस्करोत्। पर्यष्टौत्, पर्यस्तौत्। न्यष्टौत्, न्यस्तौत्। व्यष्टौत्, व्यस्तौत्। पर्यष्वजत, पर्यस्वजत। न्यष्वजत, न्यस्वजत। व्यष्वजत, व्यस्वजत इति इत्यधिकम् क.ड.इ.ह. 15. अप्राणिकर्तृकस्य ब. 16. तैलम् नास्ति ब. 17. अनुष्यन्दते इ. 18. तु इत्यधिकम् ब.क. 19. भवति इत्यधिकम् ब.क.